श्री तारा कवचं

श्री तारा कवचं

ईश्वर उवाच |
कोटितंत्रेषु गोप्या हि विद्यातिभयमोचिनी |
दिव्यं हि कवचं तस्याः शृणुष्व सर्वकामदं || 1 ||

अस्य श्रीताराकवचस्य अक्षोभ्य ऋषिः त्रिष्टुप् छंदः भगवती तारा देवता सर्वमंत्रसिद्धि समृद्धये जपे विनियोगः |

कवचं |
प्रणवो मे शिरः पातु ब्रह्मरूपा महेश्वरी |
ललाटे पातु ह्रींकारो बीजरूपा महेश्वरी || 2 ||

स्त्रींकारो वदने नित्यं लज्जारूपा महेश्वरी |
हूंकारः पातु हृदये भवानीरूपशक्तिधृक् || 3 ||

फट्कारः पातु सर्वांगे सर्वसिद्धिफलप्रदा |
खर्वा मां पातु देवेशी गंडयुग्मे भयापहा || 4 ||

निम्नोदरी सदा स्कंधयुग्मे पातु महेश्वरी |
व्याघ्रचर्मावृता कट्यां पातु देवी शिवप्रिया || 5 ||

पीनोन्नतस्तनी पातु पार्श्वयुग्मे महेश्वरी |
रक्तवर्तुलनेत्रा च कटिदेशे सदाऽवतु || 6 ||

ललज्जिह्वा सदा पातु नाभौ मां भुवनेश्वरी |
करालास्या सदा पातु लिंगे देवी हरप्रिया || 7 ||

पिंगोग्रैकजटा पातु जंघायां विघ्ननाशिनी |
प्रेतखर्परभृद्देवी जानुचक्रे महेश्वरी || 8 ||

नीलवर्णा सदा पातु जानुनी सर्वदा मम |
नागकुंडलधर्त्री च पातु पादयुगे ततः || 9 ||

नागहारधरा देवी सर्वांगं पातु सर्वदा |
नागकंकधरा देवी पातु प्रांतरदेशतः || 10 ||

चतुर्भुजा सदा पातु गमने शत्रुनाशिनी |
खड्गहस्ता महादेवी श्रवणे पातु सर्वदा || 11 ||

नीलांबरधरा देवी पातु मां विघ्ननाशिनी |
कर्त्रिहस्ता सदा पातु विवादे शत्रुमध्यतः || 12 ||

ब्रह्मरूपधरा देवी संग्रामे पातु सर्वदा |
नागकंकणधर्त्री च भोजने पातु सर्वदा || 13 ||

शवकर्णा महादेवी शयने पातु सर्वदा |
वीरासनधरा देवी निद्रायां पातु सर्वदा || 14 ||

धनुर्बाणधरा देवी पातु मां विघ्नसंकुले |
नागांचितकटी पातु देवी मां सर्वकर्मसु || 15 ||

छिन्नमुंडधरा देवी कानने पातु सर्वदा |
चितामध्यस्थिता देवी मारणे पातु सर्वदा || 16 ||

द्वीपिचर्मधरा देवी पुत्रदारधनादिषु |
अलंकारान्विता देवी पातु मां हरवल्लभा || 17 ||

रक्ष रक्ष नदीकुंजे हूं हूं फट् सुसमन्विते |
बीजरूपा महादेवी पर्वते पातु सर्वदा || 18 ||

मणिभृद्वज्रिणी देवी महाप्रतिसरे तथा |
रक्ष रक्ष सदा हूं हूं ॐ ह्रीं स्वाहा महेश्वरी || 19 ||

पुष्पकेतुरजार्हेति कानने पातु सर्वदा |
ॐ ह्रीं वज्रपुष्पं हुं फट् प्रांतरे सर्वकामदा || 20 ||

ॐ पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महेश्वरी |
हूं स्वाहा शक्तिसंयुक्ता दारान् रक्षतु सर्वदा || 21 ||

ॐ आं हूं स्वाहा महेशानी पातु द्यूते हरप्रिया |
ॐ ह्रीं सर्वविघ्नोत्सारिणी देवी विघ्नान्मां सदाऽवतु || 22 ||

ॐ पवित्रवज्रभूमे हुं फट् स्वाहा समन्विता |
पूरिका पातु मां देवी सर्वविघ्नविनाशिनी || 23 ||

ॐ आः सुरेखे वज्ररेखे हुं फट् स्वाहा समन्विता |
पाताले पातु सा देवी लाकिनी नामसंज्ञिका || 24 ||

ह्रींकारी पातु मां पूर्वे शक्तिरूपा महेश्वरी |
स्त्रींकारी पातु देवेशी वधूरूपा महेश्वरी || 25 ||

हूंस्वरूपा महादेवी पातु मां क्रोधरूपिणी |
फट् स्वरूपा महामाया उत्तरे पातु सर्वदा || 26 ||

पश्चिमे पातु मां देवी फट् स्वरूपा हरप्रिया |
मध्ये मां पातु देवेशी हूं स्वरूपा नगात्मजा || 27 ||

नीलवर्णा सदा पातु सर्वतो वाग्भवा सदा |
भवानी पातु भवने सर्वैश्वर्यप्रदायिनी || 28 ||

विद्यादानरता देवी वक्त्रे नीलसरस्वती |
शास्त्रे वादे च संग्रामे जले च विषमे गिरौ || 29 ||

भीमरूपा सदा पातु श्मशाने भयनाशिनी |
भूतप्रेतालये घोरे दुर्गमा श्रीघनाऽवतु || 30 ||

पातु नित्यं महेशानी सर्वत्र शिवदूतिका |
कवचस्य माहात्म्यं नाहं वर्षशतैरपि || 31 ||

शक्नोमि गदितुं देवि भवेत्तस्य फलं च यत् |
पुत्रदारेषु बंधूनां सर्वदेशे च सर्वदा || 32 ||

न विद्यते भयं तस्य नृपपूज्यो भवेच्च सः |
शुचिर्भूत्वाऽशुचिर्वापि कवचं सर्वकामदं || 33 ||

प्रपठन् वा स्मरन्मर्त्यो दुःखशोकविवर्जितः |
सर्वशास्त्रे महेशानि कविराड्भवति ध्रुवं || 34 ||

सर्ववागीश्वरो मर्त्यो लोकवश्यो धनेश्वरः |
रणे द्यूते विवादे च जयस्तत्र भवेद्ध्रुवं || 35 ||

पुत्रपौत्रान्वितो मर्त्यो विलासी सर्वयोषितां |
शत्रवो दासतां यांति सर्वेषां वल्लभः सदा || 36 ||

गर्वी खर्वी भवत्येव वादी स्खलति दर्शनात् |
मृत्युश्च वश्यतां याति दासास्तस्यावनीभुजः || 37 ||

प्रसंगात्कथितं सर्वं कवचं सर्वकामदं |
प्रपठन्वा स्मरन्मर्त्यः शापानुग्रहणे क्षमः || 38 ||

आनंदवृंदसिंधूनामधिपः कविराड्भवेत् |
सर्ववागीश्वरो मर्त्यो लोकवश्यः सदा सुखी || 39 ||

गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपितां |
तत्रापि कवचं देवि दुर्लभं भुवनत्रये || 40 ||

गुरुर्देवो हरः साक्षात्तत्पत्नी तु हरप्रिया |
अभेदेन भजेद्यस्तु तस्य सिद्धिरदूरतः || 41 ||

मंत्राचारा महेशानि कथिताः पूर्ववत्प्रिये |
नाभौ ज्योतिस्तथा रक्तं हृदयोपरि चिंतयेत् || 42 ||

ऐश्वर्यं सुकवित्वं च महावागीश्वरो नृपः |
नित्यं तस्य महेशानि महिलासंगमं चरेत् || 43 ||

पंचाचाररतो मर्त्यः सिद्धो भवति नान्यथा |
शक्तियुक्तो भवेन्मर्त्यः सिद्धो भवति नान्यथा || 44 ||

ब्रह्मा विष्णुश्च रुद्रश्च ये देवासुरमानुषाः |
तं दृष्ट्वा साधकं देवि लज्जायुक्ता भवंति ते || 45 ||

स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः |
प्रशंसंति सदा देवि तं दृष्ट्वा साधकोत्तमं || 46 ||

विघ्नात्मकाश्च ये देवाः स्वर्गे मर्त्ये रसातले |
प्रशंसंति सदा सर्वे तं दृष्ट्वा साधकोत्तमं || 47 ||

इति ते कथितं देवि मया सम्यक्प्रकीर्तितं |
भुक्तिमुक्तिकरं साक्षात्कल्पवृक्षस्वरूपकं || 48 ||

आसाद्याद्यगुरुं प्रसाद्य य इदं कल्पद्रुमालंबनं
मोहेनापि मदेन चापि रहितो जाड्येन वा युज्यते |
सिद्धोऽसौ भुवि सर्वदुःखविपदां पारं प्रयात्यंतके
मित्रं तस्य नृपाश्च देवि विपदो नश्यंति तस्याशु च || 49 ||

तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि वै भुवि |
तस्य गेहे स्थिरा लक्ष्मीर्वाणी वक्त्रे वसेद्ध्रुवं || 50 ||

इदं कवचमज्ञात्वा तारां यो भजते नरः |
अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः || 51 ||

लिखित्वा धारयेद्यस्तु कंठे वा मस्तके भुजे |
तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते || 52 ||

गोरोचना कुंकुमेन रक्तचंदनकेन वा |
यावकैर्वा महेशानि लिखेन्मंत्रं समाहितः || 53 ||

अष्टम्यां मंगलदिने चतुर्दश्यामथापि वा |
संध्यायां देवदेवेशि लिखेद्यंत्रं समाहितः || 54 ||

मघायां श्रवणे वापि रेवत्यां वा विशेषतः |
सिंहराशौ गते चंद्रे कर्कटस्थे दिवाकरे || 55 ||

मीनराशौ गुरौ याते वृश्चिकस्थे शनैश्चरे |
लिखित्वा धारयेद्यस्तु उत्तराभिमुखो भवेत् || 56 ||

श्मशाने प्रांतरे वापि शून्यागारे विशेषतः |
निशायां वा लिखेन्मंत्रं तस्य सिद्धिरचंचला || 57 ||

भूर्जपत्रे लिखेन्मंत्रं गुरुणा च महेश्वरि |
ध्यान धारण योगेन धारयेद्यस्तु भक्तितः |
अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा || 58 ||

इति श्रीरुद्रयामले तंत्रे उग्रताराकवचं संपूर्णं |